साधुः । तादृक् मुष्टिर्यस्य ।) विषमुष्टिक्षुपः । इति राजनिर्घण्टः ॥ (विषमुष्टिशब्देऽस्या गुणादयो ज्ञेयाः ॥)

क्षुब्धः, पुं, (क्षुभ + "क्षुब्धस्वान्तध्वान्तलग्नेति" । ७ । २ । १८ । इति निपातनात् साधुः ।) मन्थानदण्डः । इति हेमचन्द्रः ॥ षोडशरतिबन्धान्तर्गतैकादशबन्धः । यथा,—
"पार्श्वोपरि पदौ कृत्वा योनौ लिङ्गेन ताडयेत् । बाहुभ्यां धारणं गाढ़ं बन्धो वै क्षुब्धसंज्ञकः" ॥ इति रतिमञ्जरी ॥ क्षोभविशिष्टे त्रि ॥

क्षुभ, ल ङ सञ्चलने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् । लृदित् ।) लृ, अक्षुभत् । ङ, क्षोभते नानुजीविषु । इति हलायुधः । इति दुर्गादासः ॥

क्षुभ, य ग सञ्चलने । इति कविकल्पद्रुमः ॥ (दिवां-क्र्यां च-परं-अकं-सेट् ।) य, क्षुभ्यति रिपुस्त्वेवेति हलायुधः । ग, क्षुभ्नाति चुक्षोभ । इति दुर्गादासः ॥

क्षुभः, पुं, (क्षुभ + "इगुपधज्ञाप्रीकिरः" । ३ । १ । १३५ । इति कः ।) प्रवर्त्तकः । यथा,—
"ये च तेऽनुचराः सर्व्वे पादोपान्तं समाश्रिताः । माठराग्रदण्डाद्यास्तांस्तान् वन्देऽग्निक्षुभान्" ॥ इति महाभारते । ३ । ३ । ६८ ॥ "अग्निक्षुभान् विद्युदशन्यादिप्रवर्त्तकान्" । इति तट्टीकायां नीलकण्ठः ॥

क्षुभा, स्त्री, (क्षुभ + स्त्रियां टाप् ।) निग्रहानुग्रहकर्त्री देवता । यथा, महाभारते ३ । ३ । ६९ ।
"क्षुभया सहिता मैत्री याश्चान्या भूतमातरः । ताश्च सर्व्वा नमस्यामि पान्तु मां शरणागतम्" ॥ "क्षुभा मैत्र्यौ निग्रहानुग्रहकर्त्र्यौ देवते । भूतमातरः गौरीपद्मादयः । ब्राह्मीमाहेश्वर्य्यादयश्च" । इति तट्टीकायां नीलकण्ठः ॥

क्षुभितः, त्रि, (क्षुभ + कर्त्तरि क्तः ।) भीतः । इति हलायुधः ॥ सञ्चलितः । इति क्षुभधात्वर्थदर्शनात् ॥

क्षुमा, स्त्री, (क्षु + मक टाप् ।) अतसी । इत्यमरः २ । ९ । २० ॥ शणः । इति तट्टीकासारसुन्दरी ॥ नीलिका । इति मेदिनी ॥ लताभेदः । इति शब्दरत्नावली ॥

क्षुर, श विलेखने । खनने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) श, क्षुरति भूमिं लोकः । क्षोरिता । क्षुरो लोमच्छेदनः । इति दुर्गादासः ॥

क्षुरः, पुं, (क्षुर + "इगुपधेति" । ३ । १ । १३५ । कः । यद्वा, "ऋच्छेन्द्राग्रवज्रविप्रकुब्रचुब्रक्षुरखुरेति" । उणां । २ । २८ । इति निपातनात् सिद्धम् ।) कोकिलाक्षः । इत्यमरः । २ । ८ । ४९ ॥ (अस्य पर्य्याया यथा,—
"कोकिलाक्षस्तु काकेक्षुरिक्षुरः क्षुरकः क्षुरः । भिक्षुः काण्डेक्षुरप्युक्त इक्षुगन्धेक्षुवालिका" ॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) शफम् । इति तट्टीका । छेदनद्रव्यम् । तच्च नापितस्य लोमच्छेदकास्त्रम् । (यथा, मनुः । ९ । २९२ ।
"सर्व्वकण्टकपापिष्ठं हेमकारन्तु पार्थिवः । प्रवर्त्तमानमन्याये छेदयेल्लवशः क्षुरैः" ॥) गोक्षुरः । इति मेदिनी ॥ (अस्य पर्य्याया यथा,— वैद्यकरत्नमालायाम् ।
"त्रिकण्टः स्थलशृङ्गाटो गोकण्टोऽथ त्रिकण्टकः । त्रिपुटः कण्टकफलः श्वदंष्ट्रा गोक्षुरः क्षुरः" ॥ महापिण्डीतकः । शरः । इति राजनिर्घण्टः ॥ (यथा, महाभारते । १ । १३४ । ९० ।
"ततस्तस्य नगस्थस्य क्षुरेण निशितेन च । शिर उत्कृत्य तरसा पातयामास पाण्डवः" ॥) खड्गादिपादुका । इति धरणिः । क्षुरा इति भाषा ॥

क्षुरकः, पुं, (क्षुर + स्वार्थे कन् ।) तिलकवृक्षः । इत्यमरः । २ । ४ । ४० ॥ कोकिलाक्षः । (अस्य पर्य्याया यथा,—
"कोकिलाक्षस्तु काकेक्षुरिक्षुरः क्षुरकः क्षुरः । भिक्षुः काण्डेक्षुरप्युक्त इक्षुगन्धेक्षुवालिका" ॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ अस्य व्यवहारो यथा,—
"यवानी जीरके द्वे च वानरीगजपिप्पली । जातीफलं सपत्रञ्च लवङ्गागुरुचन्दनम् ॥ तालीशं तिलमाषश्च क्षुरकं गोक्षुरस्तथा । शतावरी शताङ्गा च वचा दार्व्वी पुनर्नवा ॥ निकुम्भकुम्भौ मार्ज्जारी कन्दो नागबला तथा । वासामांसी सुरासुक्तं पिप्पलीमूलमेव च ॥ मूषली वानरी ब्रह्मी शाल्मली मूलमेव च । मेथिकागजकर्णौ च शर्करा चाग्निशोधनम् । माजुफलश्चाश्वगन्धा द्राक्षा च चोचकं समम्" ॥ इत्यादिषु द्रष्टव्यम् । इति वैद्यककषायसंग्रहे वृहत्कामेश्वरमोदकान्तर्गते ॥) गोक्षुरः । इति मेदिनी ॥ भूताङ्कुशः । इति राजनिर्घण्टः ॥

क्षुरकर्म्म, [न्] क्ली, (क्षुरेणोचितं क्षुरसाध्यं वा कर्म्म ।) क्षौरम् । क्षुरद्वारा केशादिकर्त्तनम् ॥ यथा,—

"यो जन्ममासे क्षुरकर्म्म यात्रां
कर्णस्य वेधं कुरुते च मोहात् ।
नूनं स रोगं धनपुत्त्रनाशं
प्राप्नोति मूढ़ो वधबन्धनानि ॥
जातं दिनं दूषयते वशिष्ठ-
स्त्वष्टौ च गर्गो यवनो दशाहम् ।
जन्माख्यमासं किल भागुरिश्च
चूड़े विवाहे क्षुरकर्णवेधे ॥

देवकार्य्ये पितृश्राद्धे रवेरंशपरिक्षये । क्षुरिकर्म्म न कुर्व्वीत जन्ममासेऽथ जन्मभे" ॥ इति तिथ्यादितत्त्वम् ॥ क्षौरानन्तरं स्नानं कर्त्तव्यम् । यथा,—
"दुःस्वप्ने मैथुने वान्ते विरिक्ते क्षुरकर्म्मणि । चिति यूपश्मशानास्थ्नां स्पर्शने स्नानमाचरेत्" ॥ इति मिताक्षरायां प्रायश्चित्ताध्याये पराशरवचनम् ॥ अन्यत् क्षौरशब्दे द्रष्टव्यम् ॥

क्षुरधारः, पुं, (क्षुरस्य धारा इव धारा अस्य ।) अस्त्रविशेषः । यथा, महाभारते । ४ । ६ । २८ ।
"खड्गांश्च दीप्तान् दीर्घांश्च कलापांश्च महाधनान् । विपाठान् क्षुरधारांश्च धनुर्भिर्निदधुः सह" ॥ "विपाठान् बाणविशेषान् तादृशान् क्षुरधारांश्च" । इति तट्टीकायां नीलकण्ठः ॥ * ॥ क्षुरस्य शाणितमुखम् । तद्युक्ते त्रि । (यथा, महाभारते । ४ । ६२ । २७ ।
"अथ जिष्णुरुपावृत्य क्षुरधारेण कार्मुकम् । चकर्त्त भीष्मस्य तदा जातरूपपरिष्कृतम्" ॥)

क्षुरधारा, स्त्री, (क्षुरस्य धारा ।) क्षुरधारः । यथा
"अन्तकः पवनो मृत्युः पातालं वड़वामुखम् । क्षुरधारा विषं सर्पो वह्निरित्येकतः स्त्रियः" ॥ इति महाभारते । १२ । पञ्चचूड़ानारदसंवादे ३८ । २९ ॥ "अन्तकादिवत् सद्यो नाशका इत्यर्थः" । इति तट्टीकायां नीलकण्ठः ॥

क्षुरपत्त्रः, पुं, (क्षुरस्य पत्त्रमिव पत्त्रमस्य क्षुरवत् पत्त्रमस्य वा ।) शरः । इति राजनिर्घण्टः ॥ (दर्भविशेषः । यथा,—
"ततोऽन्यो दीर्घपत्त्रः स्यात् क्षुरपत्त्रस्तथैव च" ॥ इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) क्षुरतुल्यपर्णयुक्ते त्रि ॥

क्षुरपत्त्रिका, स्त्री, (क्षुर इव पत्त्रमस्याः स्वार्थे कन् स्त्रियां टापि अत इत्वम् ।) पालङ्क्यशाकम् । इति राजनिर्घण्टः ॥

क्षुरप्रः, पुं, (क्षुर इव प्राति छिनत्ति । छेदनक्रियां पूरयति वा प्र + कः । कित्वान्न गुणः ।) बाणविशेषः । इति हेमचन्द्रः ॥ (यथा, महाभारते । ४ । ५३ । ४६ ।
"स तु द्रोणं त्रिसप्तत्या क्षुरप्राणां समार्पयत्" ॥) क्षुरपानामकघासच्छेदनास्त्रञ्च ॥

क्षुरप्रं, क्ली, (क्षुरप्रं क्षुरप्रतां गच्छतीति । गम + डः ।) क्षुरप्रास्त्रम् । इति केचित् ॥ (क्षुरप्र इव गच्छतीति । क्षुरप्रसदृशास्त्रविशेषः ॥)

क्षुरभाण्डं, क्ली, (क्षुरस्य भाण्डं आधारः ।) क्षुराधारः । भाँड़ि इति भाषा । यथा,—"भद्रे ! शीघ्रमानीयतां क्षुरभाण्डं येन क्षौरकर्म्मकरणाय गच्छामि । सापि छिन्ननासिका गृहमध्यस्थितैव कार्य्यकरणापेक्षया क्षुरभाण्डात् क्षुरमेकं समाकृष्य तस्याभिमुखं प्रेषयामास" । इति विष्णुशर्म्मविरचितपञ्चतन्त्रे १ तन्त्रम् ॥

क्षुरमर्द्दी, [न्] पुं, (क्षुरं मर्द्दयतीति । क्षुर + मृद + णिनिः ।) नापितः । यथा,—
"पुंसि शेषादिकर्म्म स्यात् नापितश्चण्डिलः क्षुरी । क्षुरमर्द्दी दिवाकीर्त्तिर्मुण्डकोऽन्तावसाय्यपि" ॥ इति हेमचन्द्रः ॥

क्षुराङ्गः, पुं, (क्षुर इवाङ्गमस्य ।) गोक्षुरकः । इति राजनिर्घण्टः ॥

क्षुरिका, स्त्री, (क्षुर + ङीप् स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च ।) पालङ्क्यशाकम् । इति राजनिर्घण्टः ॥ (पालङ्क्यशब्देऽस्या विवृतिर्ज्ञातव्या ॥) शस्त्रविशेषः । क्षुरी इति भाषा । (कृष्णयजुर्व्वेदान्तर्गत उपनिषद्विशेषः । यदुक्तं मुक्तिकोपनिषदि । "अष्टनादकालाग्निरुद्रक्षुरिका सर्व्वसारेत्युपक्रम्य सरस्वतीरहस्यानां कृष्णयजुर्व्वेद-